# Devadibhih Kritam Surya Stotram 15

# देवादिभिः कृतं सूर्यस्तोत्रम् १५

## Document Information

Text title : Devadibhih Kritam Surya Stotram 15

File name : devAdibhiHkRRitaMsUryastotram15.itx

Category : navagraha, bhaviShyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | brAhmaparva | adhyAya 123/64-75||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# देवादिभिः कृतं सूर्यस्तोत्रम् १५

देवा ऊचुः ।
नमस्ते रविरूपाय सोमरूपाय ते नमः ।
नमो यजुःस्वरूपायाथर्वायाङ्गिरसे नमः ॥ ६४॥

ज्ञानैकधामभूताय निर्धूततमसे नमः ।
शुद्धज्योतिःस्वरूपाय निस्तत्त्वायामलात्मने ॥ ६५॥

नमोऽखिलजगद्व्याप्तिस्वरूपायात्ममूर्तये ।
सर्वकारणभूताय निष्ठायै ज्ञानचेतसाम् ॥ ६६॥

नमोऽस्तु ज्ञेयरूपाय प्रकाशे लक्षरूपिणे ।
भास्कराय नमस्तुभ्यं तथा शब्दकृते नमः ॥ ६७॥

संसारहेतवे चैव सन्ध्याज्योत्स्नाकृते नमः ।
त्वं सर्वमेतद्भगवाञ्जगद्वै भ्रमति त्वया ॥ ६८॥

भ्रमत्वाविद्धमखिलं ब्रह्माण्डं सचराचरम् ।
त्वदंशुभिरिदं सर्वं संसृष्टं जायते शुचि ॥ ६९॥

क्रियते त्वत्करस्पर्शाज्जलादीनां पवित्रता ।
होमदानादिको धर्मो नोपकाराय जायते ॥ ७०॥

तावद्यावन्न संयोगी जगत्यत्र भवाञ्छुचिः ।
प्रातर्होमं प्रशस्तं हि उदिते त्वयि जायते ॥ ७१॥

ऋचोऽथ सकला ह्येता यजूंषि त्वं जगत्पते ।
सकलानि च सामानि तपत्येवं जगत्सदा ॥ ७२॥

ऋङ्मयस्त्वं जगन्नाथ त्वमेव च यजुर्मयः ।
तथा साममयश्चैव ततो नाथ त्रयीमयः ॥ ७३॥

त्वमेव ब्रह्मणो रूपं परं चापरमेव च ।

मूर्तोऽमूर्तस्तथा सूक्ष्मः स्तूलरूपतया स्थितः ॥ ७४॥

निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः ।
प्रसीद स्वेच्छया रूपं स्वतेजोमयमादिश ॥ ७५॥

इत्थं संस्तूयमानस्तु देवैर्देवर्षिभिस्तथा ।

इति भविष्यपुराणे ब्राह्मे पर्वणि त्रयोविंशाधिकशततमाध्यायान्तर्गतं
देवादिभिः कृतं सूर्यस्तोत्रं समाप्तम् ।

भविष्यपुराण । ब्राह्मपर्व । अध्याय १२३/६४-७५॥

bhaviShyapurANa . brAhmaparva . adhyAya 123/64-75..

Proofread by PSA Easwaran

---

*Devadibhih Kritam Surya Stotram 15*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*